# කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

## බාහිර විභාග අංශය

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි ප්‍රථම පරීක්ෂණය (බාහිර) - 2010
2011 අප්‍රේල් / මැයි

මානවශාස්ත්‍ර පීඨය

සංස්කෘත - SANS. E1015

සංස්කෘත වීරකාව්‍ය උපදේශ කථා සාහිත්‍යය හා සංස්කෘත ඛණ්ඩ කාව්‍ය සාහිත්‍යය

පළමුවන ප්‍රශ්නය ඇතුලුව ප්‍රශ්න පහකට (05) පිළිතුරු සපයන්න.

ප්‍රශ්න සංඛ්‍යාව : 08 යි | කාලය : පැය 03 යි

---

01. පහත දැක්වෙන උධෘතයන්ගෙන්, හතරකට පමණක් සිංහලානුවාද සපයන්න.

दुःषन्त उवाच ।

सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे ।
भार्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते ।। १

सुवर्णमाला वासांसि कुण्डले परिहाटके ।
नानापत्तनजे शुभ्रे मणिरत्ने च शोभने ।। २ ।।

आहरामि तवाद्याहं निष्कादीन्यजिनानि च ।
सर्वं राज्यं तवाद्यास्तु भार्या मे भव शोभने ।। ३ ।।

गान्धर्वेण च मां भीरु विवाहेनैहि सुन्दरि ।
विवाहानां हि रम्भोरु गान्धर्वः श्रेष्ठ उच्यते ।। ४ ।।

शकुन्तलोवाच ।

फलाहारो गतो राजन्पिता मे इत आश्रमात् ।
तं मुहूर्तं प्रतीक्षस्व स मां तुभ्यं प्रदास्यति ।। ५ ।।

शाकुन्तलोपाख्यानम्

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४०

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२

[ भगवद्गीतापर्व

ततोऽम्बुधरसंकाशं प्रवृद्धशिखरं गिरिम् ।
विचित्रकूटं कूटैश्च सर्वतः परिवारितम् । २७ ।
शिलागृहैरवततं नानावृक्षसमावृतम् ।
ददर्श कपिशार्दूलो रम्यं जगति पर्वतम् । २८ ।
ददर्श च नगात् तस्मान्नदीं निपतितां कपिः ।
अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् । २९ ।
जले निपतिताग्रैश्च पादपैरुपशोभिताम् ।
वार्यमाणामिव क्रुद्धां प्रमदां प्रियबन्धुभिः । ३० ।
पुनरावृत्ततोयां च ददर्श स महाकपिः ।
प्रसन्नामिव कान्तस्य कान्तां पुनरुपस्थिताम् । ३१ ।

श्रीमद्वाल्मीकीयरामायणे

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥ १९३ ॥

तद्यदि मम सतीत्वमस्ति, मनसापि परपुरुषो नाभिलषितः, ततो देवा भूयोऽपि मे नासिकां तादृग्रूपामक्षतां कुर्वन्तु । अथवा यदि मम चित्ते परपुरुषस्य भ्रान्तिरपि भवति, मां भस्मसान्नयन्तु ।' एवमुक्त्वा भूयोऽपि तमाह—'भो दुरात्मन्, पश्य मे सतीत्वप्रभावेण तादृश्येव नासिका संवृत्ता ।' अथासावुल्मुकमादाय यावत्पश्यति तावत्तद्रूपां नासिकां च भूतले रक्तप्रवाहं च महान्तमपश्यत् । अथ स विस्मितमनास्तां बन्धनाद्विमुच्य शय्यायामारोप्य च चाटुशतैः पर्यतोषयत् । देवशर्मापि तं सर्ववृत्तान्तमालोक्य विस्मितमना इदमाह—

शम्बरस्य च या माया या माया नमुचेरपि ।
बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥ १९४ ॥

मित्रभेद १०

शिरश्शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधो गङ्गा सेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गौर्गर्दभः ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रैः प्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥

नीतिशतके

विशुष्ककण्ठोद्गतशीकराम्भसो
गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो
न दन्तिनः केसरिणोऽपि बिभ्यति ॥१५॥

हुताग्निकल्पैः सवितुर्गभस्तिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनं
कलापचक्रेषु निवेशिताननम् ॥१६॥

ऋतुसंहारे प्रथमः सर्गः ।

18. විදූරිතාරිමණ්ඩල මවිහුතභෙදයමණ්ඩලං
විචිත්‍රවර්ණසද්වයස්ඵුරද් ගභස්තිමණ්ඩලම්
ප්‍රතාපවර්පිතම් ප්‍රතාපනිර්පිතප්‍රභාකරං
විනෂ්ට සර්වසඞ්කරං නමාමි ලොකශඞ්කරම්

19. මහර්ද්ධිදර්ශනප්‍රග්නතිර්ථ නාථවික්‍රමම්
ත්‍රිවිෂ්ටපාධිරොහණෙ කෘතත්‍රිපාද වික්‍රමං
ධරාවරොහණෙ පරං ප්‍රදර්ශිතාත්ම වික්‍රමං
ප්‍රභූතවික්‍රමං නමාමි තං මහාපරාක්‍රමම්

භක්ති පුෂ්පාංජලිකා.

02. ශාකුන්තලෝපාඛ්‍යානයෙන් හෙළිවන තාපස ආරණ්‍යයක් හා බැඳුණු චාරිත්‍ර වාරිත්‍ර පිළිබඳ විමසීමක් කරන්න.

03. අධ්‍යාපනයේ ඇති වැදගත්කම පිළිබඳ නීති ශතකයේ දැක්වෙන උපදෙස් පරීක්ෂා කරන්න.

04. ''භක්ති පංචාසිකාවෙන් බුදුරදුන් පිළිබඳ අසීමිත බුද්ධභක්තිය ප්‍රකට කෙරේ.'' විමසන්න.

05. ''රාමායණය පසුකාලීන කවීන්ට පූර්වාදර්ශයක් වීය.'' කරුණු දක්වන්න.

06. භගවත් ගීතාවේ ඉගැන්වෙන මූලික කරුණු පිළිබඳ විමසීමක් කරන්න.

07. උපදේශ ග්‍රන්ථයක් ලෙස පංචතන්ත්‍රයේ වැදගත්කම විමසීමට ලක්කරන්න.

08. තරුණ කවියෙකු ලෙස කාලිදාසයන්ගේ කාව්‍ය ප්‍රතිභාව පිළිබඳව ඍතුසංහාරය ඇසුරින් පිරික්සන්න.

****************************